# yoga sūtras of patañjali

# chapter 1

## समाधिपादः
samādhipādaḥ

अथ योगानुशासनम् । १
atha yogānuśāsanam । 1

योगश्चित्तवृत्तिनिरोधः । २
yogaścittavṛttinirodhaḥ । 2

तदा द्रष्टुः स्वरूपेऽवास्थानम् । ३
tadā draṣṭuḥ svarūpe'vāsthānam । 3

वृत्तिसारूप्यमितरत्र । ४
vṛttisārūpyamitaratra । 4

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः । ५
vṛttayaḥ pañcatayyaḥ kliṣṭākliṣṭāḥ । 5

# chapter 1

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः । ६
pramāṇaviparyayavikalpanidrāsmṛtayaḥ । 6

प्रत्यक्षानुमानागमाः प्रमाणानि । ७
pratyakṣānumānāgamāḥ pramāṇāni । 7

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् । ८
viparyayo mithyājñānamatadrūpapratiṣṭham । 8

# chapter 1

शब्दज्ञनानुपाती वस्तुशून्यो विकल्पः । ९

śabdajñanānupātī vastuśūnyo vikalpaḥ । 9

अभावप्रत्ययालम्बना तमोवृत्तिर्निद्रा । १०

abhāvapratyayālambanā tamovṛttirnidrā । 10

अनुभूतविषयासंप्रमोषः स्मृतिः । ११

anubhūtaviṣayāsaṁpramoṣaḥ smṛtiḥ । 11

अभ्यासवैराग्याभ्यां तन्निरोधः । १२
abhyāsavairāgyābhyāṁ tannirodhaḥ । 12

तत्र स्थितौ यत्नोऽभ्यासः । १३
tatra sthitau yatnoʽbhyāsaḥ । 13

स तु दीर्घकालनैरन्तर्यसत्कारादरासेवितो दृढभूमिः । १४
sa tu dīrghakālanairantaryasatkārādarāsevito dṛḍhabhūmiḥ । 14

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यम् । १५
dṛṣṭānuśravikaviṣayavitṛṣṇasya vaśīkārasaṁjñāvairāgyam । 15

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् । १६
tatparaṁ puruṣakhyāterguṇavaitṛṣṇyam । 16

वितर्कविचारानन्दास्मितारुपानुगमात्संप्रज्ञातः । १७
vitarkavicārānandāsmitārupānugamātsaṁprajñātaḥ । 17

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः । १८
virāmapratyayābhyāsapūrvaḥ saṁskāraśeṣo'nyaḥ । 18

भवप्रत्ययो विदेहप्रकृतिलयानाम् । १९
bhavapratyayo videhaprakṛtilayānām । 19

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् । २०
śraddhāvīryasmṛtisamādhiprajñāpūrvaka itareṣām । 20

# chapter 1

तीव्रसंवेगानामासन्नः । २१
tīvrasaṁvegānāmāsannaḥ । 21

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः । २२
mṛdumadhyādhimātratvāttato'pi viśeṣaḥ । 22

ईश्वरप्रणिधानाद्वा । २३
īśvarapraṇidhānādvā । 23

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । २४
kleśakarmavipākāśayairaparāmṛṣṭaḥ puruṣaviśeṣa īśvaraḥ । 24

तत्र निरतिशयं सर्वज्ञबीजम् । २५
tatra niratiśayaṁ sarvajñabījam । 25

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् । २६
sa eṣa pūrveṣāmapi guruḥ kālenānavacchedāt । 26

तस्य वाचकः प्रणवः । २७
tasya vācakaḥ praṇavaḥ । 27

तज्जपस्तदर्थभावनम् । २८
tajjapastadarthabhāvanam । 28

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च । २९
tataḥ pratyakcetanādhigamo ̍pyantarāyābhāvaśca । 29

व्याधिस्त्यानसंशयप्रमादालस्याविरति भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः । ३०

vyādhistyānasaṁśayapramādālasyāvirati
bhrāntidarśanālabdhabhūmikatvānavasthitatvāni cittavikṣepāsteʾntarāyāḥ । 30

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः । ३१

duḥkhadaurmanasyāṅgamejayatvaśvāsapraśvāsā vikṣepasahabhuvaḥ । 31

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः । ३२

tatpratiṣedhārthamekatattvābhyāsaḥ । 32

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् । ३३
maitrīkaruṇāmuditopekṣāṇāṁ sukhaduḥkhapuṇyāpuṇyaviṣayāṇāṁ bhāvanātaścittaprasādanam । 33

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य । ३४
pracchardanavidhāraṇābhyāṃ vā prāṇasya । 34

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धिनी । ३५
viṣayavatī vā pravṛttirutpannā manasaḥ sthitinibandhinī । 35

# chapter 1

विशोका वा ज्योतिष्मती । ३६
viśokā vā jyotiṣmatī । 36

वीतरागविषयं वा चित्तम् । ३७
vītarāgaviṣayaṁ vā cittam । 37

स्वप्ननिद्राज्ञानालम्बनं वा । ३८
svapnanidrājñānālambanaṁ vā । 38

यथाभिमतध्यानाद्वा । ३९
yathābhimatadhyānādvā । 39

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः । ४०
paramāṇuparamamahattvānto ̍sya vaśīkāraḥ । 40

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः । ४१
kṣīṇavṛtterabhijātasyeva maṇergrahītṛgrahaṇagrāhyeṣu tatsthatadañjanatā samāpattiḥ । 41

तत्र शब्दार्थज्ञानविकल्पैः संकीर्ण सवितर्का समापत्तिः । ४२
tatra śabdārthajñānavikalpaiḥ saṁkīrṇa savitarkā samāpattiḥ । 42

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का । ४३
smṛtipariśuddhau svarūpaśūnyevārthamātranirbhāsā nirvitarkā । 43

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता । ४४
etayaiva savicārā nirvicārā ca sūkṣmaviṣayā vyākhyātā । 44

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् । ४५
sūkṣmaviṣayatvaṁ cāliṅgaparyavasānam । 45

ता एव सबीजः समाधिः । ४६
tā eva sabījaḥ samādhiḥ । 46

निर्विचारवैशारद्येऽध्यात्मप्रसादः । ४७
nirvicāravaiśāradye 'dhyātmaprasādaḥ । 47

# chapter 1

ऋतंभरा तत्र प्रज्ञा । ४८
ṛtaṁbharā tatra prajñā । 48

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् । ४९
śrutānumānaprajñābhyāmanyaviṣayā viśeṣārthatvāt । 49

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी । ५०
tajjaḥ saṁskāro'nyasaṁskārapratibandhī । 50

# chapter 1

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः । ५१

tasyāpi nirodhe sarvanirodhānnirbījaḥ samādhiḥ । 51